श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३

*भक्तस्वरूपवर्णनं भक्तिप्रार्थना च*

पठन्तो नामानि प्रमदभरसिन्धौ निपतिताः
    स्मरन्तो रूपं ते वरद कथयन्तो गुणकथाः।
चरन्तो ये भक्तास्त्वयि खलु रमन्ते परममू-
    नहं धन्यान्मन्ये समधिगतसर्वाभिलषितान्॥ १॥

गदक्लिष्टं कष्टं तव चरणसेवारसभरे-
    ऽप्यनासक्तं चित्तं भवति बत विष्णो कुरु दयाम्।
भवत्पादाम्भोजस्मरणरसिको नामनिवहा-
    नहं गायं गायं कुहचन विवत्स्यामि विजने॥ २॥

कृपा ते जाता चेत् किमिव नहि लभ्यं तनुभृतां
    मदीयक्लेशौघप्रशमनदशा नाम कियती।
न के के लोकेऽस्मिन्ननिशमयि शोकाभिरहिता
    भवद्भक्ता मुक्ताः सुखगतिमसक्ता विदधते॥ ३॥

मुनिप्रौढा रूढा जगति खलु गूढात्मगतयो
    भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः।
चरन्तीश स्वैरं सततपरिनिर्भातपरचि-
    त्सदानन्दाद्वैतप्रसरपरिमग्नाः किमपरम्॥ ४॥

भवद्भक्तिः स्फीता भवतु मम सैव प्रशमये-
    दशेषक्लेशौघं न खलु हृदि सन्देहकणिका।
न चेद्व्यासस्योक्तिस्तव च वचनं नैगमवचो
    भवेन्मिथ्या रथ्यापुरुषवचनप्रायमखिलम्॥ ५॥

www.prapatti.com

भवद्भक्तिस्तावत्प्रमुखमधुरा त्वद्गुणरसात्
किमप्यारूढा चेदखिलपरितापप्रशमनी।
पुनश्चान्ते स्वान्ते विमलपरिबोधोदयमिल-
न्महानन्दाद्वैतं दिशति किमतः प्रार्थ्यमपरम्॥ ६ ॥

विधूय क्लेशान् मे कुरु चरणयुग्मं धृतरसं
भवत्क्षेत्रप्राप्तौ करमपि च ते पूजनविधौ।
भवन्मूर्त्यालोके नयनमथ ते पादतुलसी-
परिघ्राणे घ्राणं श्रवणमपि ते चारुचरिते॥ ७ ॥

प्रभूताधिव्याधिप्रसभचलिते मामकहृदि
त्वदीयं तद्रूपं परमसुखचिद्रूपमुदियात्।
उदञ्चद्रोमाञ्चो गलितबहुहर्षाश्रुनिवहो
यथा विस्मर्यासं दुरुपशमपीडापरिभवान्॥ ८ ॥

मरुद्गेहाधीश त्वयि खलु पराञ्चोऽपि सुखिनो
भवत्स्नेही सोऽहं सुबहु परितप्ये च किमिदम्।
अकीर्तिस्ते मा भूद्वरद गदभारं प्रशमयन्
भवद्भक्तोत्तंसं झटिति कुरु मां कंसदमन॥ ९ ॥

किमुक्तैर्भूयोभिस्तव हि करुणा यावदुदिया-
दहं तावद्देव प्रहितविविधार्तप्रलपितः।
पुरः क्लृप्ते पादे वरद तव नेष्यामि दिवसान्
यथाशक्ति व्यक्तं नतिनुतिनिषेवा विरचयन्॥ १० ॥

**********